चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥
क्षीणायुषः क्षीणसत्त्वान्दुर्म्मेधान् वीक्ष्य कालतः ।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतचोदिताः ॥
अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः ।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्म्मगुप्तये ॥
पराशरात् सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्व्विधम् ॥
ऋगथर्व्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥
तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्व्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥"
"वैशम्पायनशिष्या वै चरकाध्वर्य्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ॥
याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥
देवरातसुतः सोऽपि छर्द्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥
याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधि गवेषयन् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥"
"एवं स्तुतः स भगवान् वाजिरूपधरो रविः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥
यजुर्भिरकरोच्छाखा दश पञ्च शतैर्विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ॥"
अयमेव महर्षिर्मिथिलास्थ एव सामश्रवःप्रभृतिभिः ऋषिभिर्वर्णाश्रमेतरधर्म्मज्ञानार्थमादिष्ट आचारव्यवहारप्रायश्चित्ताख्यकाण्डत्रयात्मकं धर्म्मशास्त्रं प्रणीय तेभ्यः आवितवान् । यदुक्तं याज्ञवल्क्यसंहितायां ग्रन्थारम्भे ।
"योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ।
मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन् ॥")
क्ली, उपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।
"गोपालतापनं कृष्णं याज्ञवल्क्यं वराहकम् ॥")
याज्ञसेनी, स्त्री, यज्ञसेनस्य अपत्यम् ॥ (यज्ञसेन + अण् । ङीप् ।) सा च द्रौपदी । इति हेमचन्द्रः । ३ । ३७५ ॥ (यथा, महाभारते । ४ । ४ । ५६ ।
"याज्ञसेनीं पुरस्कृत्य षड़ेवाथ प्रवव्रजुः ॥"
अस्या विवरणं द्रौपदीशब्दे द्रष्टव्यम् ॥)
याज्ञिकः, पुं, (यज्ञमर्हति यज्ञाय हितो वा । यज्ञ + ठक् ।) दर्भभेदः ॥ (यज्ञं यज्ञविद्यामधीते वेद वा । यज्ञ + ठक् ।) याजकः । यज्ञकर्त्ता । इति शब्दरत्नावली ॥ (यथा, भागवते । ११ । १० । २३ ।
"इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥")
रक्तखदिरः । पलाशः । अश्वत्थः । इति राजनिर्घण्टः ॥
याज्ञिक्यं, क्ली, (याज्ञिकानां धर्म्म आम्नायो वा । याज्ञिक + "छन्दोगौक्थिकयाज्ञिकबह्वृच नटाञ्ञ्यः ।" ४ । ३ । १२९ । इति ञ्यः ।) यज्ञः । इति सिद्धान्तकौमुदी ॥
याज्यं, क्ली, (इज्यत इति । यज् + ण्यत् । "यजयाचरुचप्रवचर्चश्च ।" ७ । ३ । ६६ । इति कुत्वनिषेधः ।) यागलब्धधनादि । इति सिद्धान्तकौमुदी ॥ यजनीये, त्रि ॥ (यथा, मनौ । ८ । ३१७ ।
"अन्नादेर्भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषात् ॥"
शिष्यः । शासनार्हः । यथा, देवीभागवते । १ । १८ । ६ ।
"याज्योऽस्ति जनकस्तत्र जीवन्मुक्तो नराधिपः ।
विदेहो लोकविदितः पाति राज्यमकण्टकम् ॥")
याज्या, स्त्री, (यजन्त्यनया । यज् + ण्यत् + टाप् ।) ऋक् । इति मुग्धबोधव्याकरणम् ॥ (गङ्गा । यथा, काशीखण्डे सहस्रनामकीर्त्तने । २९ । १४२ ।
"योगसिद्धिप्रदा याज्या यज्ञेशपरिपूजिता ॥")
यात्, ष, आख्यातप्रत्ययविशेषः । स च विधिलिङाशीर्लिङः परस्मैपदप्रथमपुरुषैकवचनम् । स तु विध्याद्यर्थक आशीर्व्वादार्थकश्च । इति व्याकरणम् ॥ मुग्धबोधमते विध्याद्यर्थे अस्य स्त्रीसंज्ञा । आशीरर्थे ढीसंज्ञा ॥
यातं, क्ली, (या + क्तः ।) निषादिनां पादकर्म्म । इति हेमचन्द्रः । ४ । १६७ ॥ पुस्तकान्तरे यतमिति पाठः । यथा, —
"अपष्टत्वङ्कुशस्याग्रं घातमङ्कुशवारणम् ।
निषादिनां पादकर्म्म या(य)तं वीतन्तु तद्द्वयम् ॥"
यातः त्रि, गतः । याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, मनुः । ४ । १७८ ।
"येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यति ॥")
यातना, स्त्री, (यत् + णिच् + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । टाप् ।) गाढ़वेदना । तत्पर्य्यायः । कारणा २ तीव्रवेदना ३ । इत्यमरः । २ । ८ । ३ ॥ अतिव्यथा ४ । इति शब्दरत्नावली ॥ (यथा, भागवते । ७ । १ । ४१ ।
"हिरण्यकशिपुः पुत्त्रं प्रह्लादं केशवप्रियम् ।
जिघांसुरकरोन्नानायातना मृत्युहेतवे ॥")
नरकदण्डा । इति केचिदिति भरतः ॥
यातयामं, त्रि, (यातो गतो याम उपभोगकालो वीर्य्यं वा यस्य ।) जीर्णम् । (यथा, भट्टिकाव्ये । ५ । ३९ ।
"तं भीतद्वारमाक्रुश्य रावणः प्रत्यभाषत ।
यातयामं विजितवान् स रामं यदि किन्ततः ॥")
परिभुक्तम् । इत्यमरः । ३ । ३ । १४५ ॥ उज्झितम् । इति मेदिनी । मे, ६२ ॥ (प्राप्तशैत्यावस्थम् । यथा, गीतायाम् । १७ । १० ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"
गतरसः । यथा, शाङ्खायनब्राह्मणे । ४ । ३ । १३ ।
"ब्रह्मवादिनो वदन्ति यातयामाः संवत्सरा अयातयामा इति ते नायातयामेति वक्तव्यम् ।"
"यातयामः गतरसः ।" इति सायणः ॥)
याता, [ऋ] स्त्री, (यततेऽन्योन्यमेदायेति । यत् + "तृन् ।" उणा० २ । ९८ । इति तृन् ।) पतिभ्रातृपत्नी । इत्यमरः । २ । ६ । ३० ॥ या इति भाषा । (यथा, साहित्यदर्पणे । ३ । ७८ ।
"स्वामी निश्वसितेऽप्यसूयति मनो जिघ्रः सपत्नीजनः
श्वश्रूरिङ्गितदैवतं नयनयोरीहालिहो यातरः ॥"
या + तृच् । गमनकर्त्तरि, त्रि ॥ (यथा, ऋक्संहितायाम् । ३२ । १३ ।
"उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥"
सारथ्यादिः । यथा, मनौ । ८ । २९० ।
"यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥"
"यातुः सारथ्यादेः ।" इति कुल्लूकः ॥ हन्ता । यथा, ऋग्वेदे । १ । ३२ । १४ ।
"अहेर्यातारं कमपश्य इन्द्र ।"
"यातारं हन्तारम् ।" इति तद्भाष्ये सायणः ॥)
यातायातं, क्ली, गमनागमनम् । यथा, —
"पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्
निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥"
इति श्रीभागवते १२ स्कन्धे १३ अध्यायः ॥
यातिकः, पुं, (यातं गमनं प्राप्तस्येनास्त्यस्येति । यात + ठन् ।) पान्थः । इति शब्दरत्नावली ॥
यातु, क्ली, (सर्व्वेषामन्तं यातीति । या + "कमिमनिजनीति ।" उणा० १ । ७३ । इति तुः ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥ (यथा, —
"यातु यातुप्रवीराणां प्रणम्य चरणानसौ ॥"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ॥
(पुंलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ७ । २१ । ५ ।
"न यातव इन्द्र जूजुवुर्नो न ।"
"यातवो राक्षसाः ।" इति तद्भाष्ये सायणः ॥)
यातुः, पुं, (सर्वान्तं याति गच्छतीति । या + "कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) कालः । अध्वगः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (क्ली, यातना । यथा, ऋग्वेदे । ८ । ४९ । २० ।
"मा नो रक्ष आवेशीदाघृणीवसो मायातुर्यातुमावताम् ॥"